"यज्ञेन वाजमेधेन स्वर्जिता गोसवेन वा ।
अभिजिद्विश्वजिद्भ्यां वा त्रिवृतामिष्टुतापि वा ॥")
गोसग्रन्थः, पुं, (गोस एव ग्रन्थः ग्रन्थतुल्यः इति गोवलीवर्द्दन्यायेन सिद्धः ।) बोलः । इत्यमरटीकायां रायमुकुटः ॥
गोसहस्री, स्त्री, (गवां सहस्रं तद्दानफलं विद्यते यत्र । अर्श आदित्वादच् गौरादित्वात् ङीष् ।) मङ्गलवारयुक्तामावास्या । तत्र गङ्गास्नाने सहस्रगोदानफलम् । यथा, व्यासः ।
"अमावास्यां भवेद्वारो यदि भूमिसुतस्य च ।
गोसहस्रफलं दद्यात् स्नानमात्रेण जाह्नवी ॥"
इति तिथ्यादितत्त्वम् ॥ * ॥
सोमवारयुक्तामावास्या । तत्र अरुणोदयकालमारभ्य स्नानकालपर्य्यन्तं मौनीभूत्वा स्नानात् गोसहस्रदानफलम् । यथा व्यासः ।
"सिनीवाली कुहूर्व्वापि यदि सोमदिने भवेत् ।
गोसहस्रफलं दद्यात् स्नानं यन्मौनिना कृतम् ॥"
इति च तिथ्यादितत्त्वम् ॥
गोस्तनः, पुं, (गोः स्तन इव गुच्छो यस्य ।) हारभेदः । इत्यमरः । २ । ६ । १०५ ॥ स तु चतुर्यष्टिकः । चतुस्त्रिंशद्यष्टिक इति केचित् । इति भरतः ॥ (गवां स्तनः ।) गवां कुचश्च ॥ (यथा, सुश्रुते उत्तरतन्त्रे १ मे अध्याये ।
"सुवृत्तं गोस्तनाकारं सर्व्वभूतगुणोद्भवम् ॥")
गोस्तना, स्त्री, (गोः स्तन इव फलमस्याः । ङीषभावपक्षे टाप् ।) गोस्तनी । इत्यमरटीका ॥
गोस्तनी, स्त्री, (गोः स्तन इव फलमस्याः । "स्वाङ्गाच्चोपसर्ज्जनादसंयोगोपधात् ।" ४ । १ । ५४ । इति ङीष् ।) द्राक्षा । इत्यमरः । २ । ४ । १०७ ॥ कपिलद्राक्षा । इति राजनिर्घण्टः ॥ (अस्याः पर्य्यायाः ।
"द्राक्षा स्वादुफला प्रोक्ता तथा मधुरसापि च ।
मृद्वीका हारहूरा च गोस्तनी चापि कीर्त्तिता ॥"
इष्या स्याद् गोस्तनी द्राक्षा गुर्व्वी च कफपित्तनुत् ॥
गोस्तनी सुवक्ता इति ।" इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥ गोः स्तना इव स्तना यस्याः । कुमारानुचारिणी मातृगणानामन्यतमा । यथा, महाभारते । ९ । ४६ । ३ ।
"प्रभावती विशालाक्षी पलिता गोस्तनी तथा ।"
गोनसीति पाठोऽपि वर्त्तते ॥)
गोस्थानं, क्ली, (गवां स्थानम् ।) गोष्ठम् । इति शब्दरत्नावली ॥ (यथा, हरिवंशे । ६० । २७ ।
"भार्गलद्वारगोवाटं मध्ये गोस्थानसङ्कुलम् ॥")
गोस्थानकं, क्ली, (गोस्थान + स्वार्थे कन् ।) गोष्ठम् । इत्यमरः । २ । १ । १३ ॥
गोस्वामी, [न्] त्रि, (गवां स्वामी ।) गोपतिः । इति हलायुधः ॥ (यथा, मनुः । ८ । २३१ ।
"गोपः क्षीरभृतो यस्तु स दुह्याद्दशतो वराम् ।
गोस्वाम्यनुमते भृत्यः सा स्यात् पालेऽभृते भृतिः ॥")
स्वनंस्य सुतो वा प्रभुः । (यद्वा, गवां इन्द्रियाणां स्वामी । जितेन्द्रियतया एव तथात्वम् ।) यथा । "श्रीसनातनगोस्वामी प्रिया श्रीरतिमञ्जरी ।" इत्यनन्तसंहिता ॥
गोहत्या, स्त्री, (गवां हत्या हननम् ।) गोवधः । तत्प्रायश्चित्तादि प्रायश्चित्तशब्दे द्रष्टव्यम् ॥ * ॥ पारिभाषिकगोहत्या यथा,—
सावित्र्युवाच ।
"विप्रहत्याञ्च गोहत्यां किंविधामातिदेशिकीम् ।
का वा नृणामगम्या वा को वा सन्ध्याविहीनकः ॥
एतेषां लक्षणं सर्व्वं वद वेदविदां वर ! ॥
यम उवाच ।
गामाहारं प्रकुर्व्वन्तं पिबन्तं यो निवारयेत् ।
याति गोविप्रयोर्मध्ये गोहत्याञ्च लभेत् सः ॥
दण्डैर्गोस्ताडयन् मूढो यो विप्रो वृषवाहकः ।
दिने दिने गवां हत्यां लभते नात्र संशयः ॥
ददाति गोभ्य उच्छिष्टं भोजयेद्वृषवाहकम् ।
भोजयेद्वृषवाहान्नं स गोहत्यां लभेद् ध्रुवम् ॥
वृषलीपतिं याजयेद् यो भुङ्क्तेऽन्नं तस्य यो नरः ।
गोहत्याशतकं सोऽपि लभते नात्र संशयः ॥
पादं ददाति वह्नौ यो गाश्च पादेन ताड़येत् ।
गृहं विशेदधौताङ्घ्रिः स्नात्वा गोवधमालभेत् ॥
यो भुङ्क्तेऽस्निग्धपादेन शेते स्निग्धाङ्घ्रिरेव च ।
सूर्य्योदये च द्विर्भोजी स गोहत्यां लभेद् ध्रुवम् ॥
अवीरान्नञ्च यो भुङ्क्ते योनिजीवी च ब्राह्मणः ।
यस्त्रिसन्ध्याविहीनश्च स गोहत्यां लभेद् ध्रुवम् ॥
पितॄंश्च पर्व्वकाले च तिथिकाले च देवताः ।
न सेवतेऽतिथिं यो हि स गोहत्यां लभेद् ध्रुवम् ॥
स्वभर्त्तरि च कृष्णे वा भेदबुद्धिं करोति या ।
कटूक्त्या ताड़येत् कान्तं सा गोहत्यां लभेद् ध्रुवम् ॥
गोमार्गं खननं कृत्वा ददाति शस्यमेव च ।
तड़ागे च तदूर्द्ध्वं वा स गोहत्यां लभेद् ध्रुवम् ॥
प्रायश्चित्तं गोवधस्य यः करोति व्यतिक्रमम् ।
अर्थलोभादथाज्ञानात् स गोहत्यां लभेद् ध्रुवम् ॥
राजके दैवके यत्नात् गोस्वामी गां न पालयेत् ।
दुःखं ददाति यो मूढो गोहत्यां लभते ध्रुवम् ॥
प्राणिनं लङ्घयेद्यो हि देवार्च्चामनलं जलम् ।
नैवेद्यं पुष्पमन्नञ्च स गोहत्यां लभेद् ध्रुवम् ॥
शश्वन्नास्तीति वादी यो मिथ्यावादी प्रतारकः ।
देवद्वेषी गुरुद्वेषी स गोहत्यां लभेद् ध्रुवम् ॥
देवताप्रतिमां दृष्ट्वा गुरुं वा ब्राह्मणं प्रति ।
न सम्भ्रमान्नमेत् यो हि स गोहत्यां लभेद् ध्रुवम् ॥
न ददात्याशिषं कोपात् प्रणताय च यो द्विजः ।
विद्यार्थिने च विद्याञ्च स गोहत्यां लभेद् ध्रुवम् ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २७ अध्यायः ॥
गोहनं, क्ली, (वह विलासाद्ये + क्तः । हननम् । गोहननं विष्ठा ।) गोमयम् । इति रत्नमाला ॥
गोहरीतकी, स्त्री, (गवां हरीतकीव हितकारित्वात् ।) बिल्ववृक्षः । इति शब्दरत्नावली ॥
गोहालिया, स्त्री, लताविशेषः । गोयालिया इति भाषा ॥ यथा, गारुड़े १९० अध्याये ।
"पीतं गोहालियामूलं तिलदध्यान्यसंयुतम् ।
नियच्छतत्रं कथितं प्रवर्त्तयति शङ्कर ! ॥"
गोहितः, पुं, (गोषु हितः ।) घोषलता । विल्वः । इति शब्दचन्द्रिका ॥ गवां हितकारके त्रि ॥ (गोर्भूमेर्भारावतरणे स्वेच्छया शरीरग्रहणं कुर्व्वन् गोहितः, यद्वा गवां रक्षार्थं गोवर्द्धनं धृतवानिति गोहितः । विष्णुः । यथा, महाभारते । १३ । १४९ । ७६ ।
"गोहितो गोपतिर्गोप्ता वृषभाक्षो वृषप्रियः ॥")
गोहिरं, क्ली, (गुह + बाहुलकादिरच् ।) पादमूलम् । इति हेमचन्द्रः । ३ । २८० ॥
गोह्यं, त्रि, (गुहू ञ् संवरणे + "शंसिदुहिगुहिभ्यो वा ।" इति काशिकोक्तेः क्यबभावपक्षे ण्यत् ।) गुह्यम् । गोपनीयम् । इति पाणिनिव्याकरणम् ॥
गौः, [गो] पुं स्त्री, (गच्छतीति । गम + "गमेर्डोः ।" उणां । २ । ६७ । इति डोः । यद्वा, गच्छत्यनेनेति करणे डोः । वृषस्य यानसाधनत्वात् स्त्रीगवा दानेन स्वर्गगमनसाधनत्वाच्च उभयोरपि दानेन स्वर्गगमनत्वाद्वा तथात्वम् । वस्तुतस्त्वयं रूढ़ एव शब्दः । यदुक्तम् ।
"रूढ़ा गवादयः प्रोक्ता यौगिकाः पाचकादयः ।
योगरूढ़ाश्च विज्ञेयाः पङ्कजाद्या मनीषिभिः ॥")
स्वनामख्यातपशुः । गरु इति भाषा ॥ पुंगोः पर्य्यायः अनड्वान् इति शब्दे द्रष्टव्यः ॥ स्त्रीगोः पर्य्यायः । माहेयी २ सौरभेयी ३ उस्रा ४ माता ५ शृङ्गिणी ६ अर्ज्जुनी ७ अघ्न्या ८ रोहिणी ९ । इत्यमरः ॥ माहेन्द्री १० इज्या ११ धेनुः १२ अघ्ना १३ दोग्ध्री १४ भद्रा १५ भूरिमही १६ अनडुही १७ कल्याणी १८ पावनी १९ गौरी २० सुरभिः २१ मही २२ निलिम्पिः २३ सुरभी २४ अनड्वाही २५ इड़ा २६ अघमा २७ । इति शब्दरत्नावली ॥ बहुला २८ मही २९ सरस्वती ३० । इति जटाधरः ॥ उस्रिया ३१ अही ३२ अदितिः ३३ इला ३४ जगती ३५ शर्करी ३६ । इति वेदनिघण्टौ २ अध्यायः ॥ * ॥ (गवां लक्षणादिकं यथा, बृहत्संहितायां ६१ अध्याये ।
"पराशरः प्राह बृहद्रथाय
गोलक्षणं यत् क्रियते ततोऽयम् ।
मया समासः शुभलक्षणास्ताः
सर्व्वास्तथाप्यागमतोऽभिधास्ये ॥
सास्राविलरूक्षाक्ष्यो मूषकनयनाश्च न शुभदा गावः ।
प्रचलच्चिपिटविषाणाः करटाः खरसदृशवर्णाः ॥
दशसप्तचतुर्दन्त्यः प्रलम्बमुण्डानना विनतपृष्ठाः ।
ह्रस्वस्थूलग्रीवा यवमध्या दारितखुराश्च ॥
श्यावातिदीर्घजिह्वा गुल्फैरतितनुभिरतिबृहद्भिर्वा ।
अतिककुदाः कृशदेहा नेष्टा हीनाधिकाङ्ग्यश्च ॥
वृषभोऽप्येवं स्थूलातिलम्बवृषणः शिरातताक्रोड़ः ।
स्थूलशिराचितगण्डस्त्रिस्थानं मेहते यश्च ॥
मार्ज्जाराक्षः कपिलः करटो वा न शुभदो द्विजस्येह ।